# विद्यालयप्रशासनं सङ्घटनञ्च

संस्कृतानुवादकौ

डॉ॰ सन्तोष मित्तलः
डॉ॰ फतेहसिंहः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# विद्यालयप्रशासनं सङ्घटनञ्च

हिन्दीमूलम्
एस्० पी० सुखिया

संस्कृतानुवादकौ
सन्तोष मित्तलः
फतेहसिंहः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# भूमिका

विदन्त्येव विद्वांसो यद् देशेऽस्मिन् विलसन्ति नाना जातयो, नाना धर्मा नाना भाषाश्च। 'जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसम्' इति निगदद्भिरस्मदनूचानैरपि भाषाणां वैविध्यं वैपुल्यं चोरीकृतं भारतीये महाद्वीपे। भाषासु परस्परमन्तःसंवादो भारतीयपरम्परायाः अप्रतिमो विशेषः। अस्मिंश्चान्तःसंवादे संस्कृतस्य अनितरसाधारणी भूमिका बभूवेति न संशीतिः, यतो हि संस्कृतं सुनिश्चितं सुसंस्कृतं सुदृढं सेतुबन्धं व्यरचयद् भाषावैविध्यमये संसारे। अत एव संस्कृतं हि नाम ''भारतीयविभिन्नवाङ्मयतत्त्वसारसरस्वती'' वरीवर्तीति युक्तमुक्तं केनापि महाकविना। यथा अद्यत्वे तथा पुराकालेऽपि गुणाढ्यकृतबृहत्कथासदृशाः साहित्यस्य महान्तो ग्रन्थनिधयः संस्कृतेऽनूद्य संरक्षिताः। अथ चाविर्भवत्सु नवीनेषु प्रस्थानेषु तद्विषयका ग्रन्थाः सम्प्रति समधिकतरमितरभाषाभ्यः संस्कृतेऽनूद्य प्रकाश्यन्ते। एतादृशानामनुवादानां ज्ञानस्य समुन्मेषे विस्तारे चिन्तनस्य समुल्लासे च अनुत्तमा भूमिका वर्तते इति निश्चप्रचम्।

संस्कृतभाषा यथा चिरपुरातनी सनातनी तथैव प्रतियुगं पुनःपुनर्जायमाना उषा इव नवविच्छित्तिं नूतनां च छविमाविर्भावयन्ती वरीवर्तते, इदानीमपि स्वे महिम्नि प्रतिष्ठिता चास्त इति जानन्त्येव सर्वे सुरभारतीसमुपासकाः। साम्प्रतिकेऽस्मिन् समये अस्या भाषाया नवोन्मेषः कामपि अभिख्यां तनोति। नैके उदीयमाना-स्तरुणास्तेजस्विनः पण्डिताः प्रकटयन्ति शास्त्रवैभवमस्याः। संस्कृतभाषायामिदानीमपि प्रौढा परिष्कृताः शास्त्रग्रन्था विरच्यन्ते। यथा मौलिकं तथैवानूदितमपि साहित्यं संस्कृतस्य प्रथयति गौरवम्। अनुवादेषु जागरूकैर्विपश्चिदपश्चिमैर्नवीना विषया सविशेषमङ्गीकृताः। एतादृशेषु नवीनेषु विषयेषु शिक्षाशास्त्रमपि वर्तते महत्त्वपूर्णो विषयः।

राष्ट्रियसंस्कृतसंस्थानस्य अष्टसु परिसरेषु शिक्षाशास्त्रमध्याप्यते। यद्यपि शिक्षापद्धतीनां शिक्षाविषयाणां च विवेचनं प्राप्यते प्राचीने संस्कृतसाहित्ये

# विषय-सूची

## खण्डः ( अ )

## शिक्षा-प्रशासनम्

## (Educational Administration)

1. **शिक्षाप्रशासनम्** 3-20

**(Educational Administration)**

प्रशानसनव्यवस्थापनयोर्भेदः, शिक्षाप्रशासनस्य ऐतिहासिकपृष्ठ-भूमिः, शिक्षाप्रशासनस्यार्थः, शिक्षाप्रशासनस्य भेदाः, शिक्षाप्रशासनस्याधाराः, राष्ट्रियलक्ष्याणि आकाङ्क्षाः शिक्षा-प्रशासनञ्च, शिक्षायाः प्रशासनिकप्रक्रिया (1) निर्णयनम् (2) नियोजनम् (3) सङ्घटनम् (4) सम्प्रेषणम् (5) निर्देशनम् (6) समन्वयस्थापनम् (7) प्रतिवेदननिर्माणम् (8) आयव्ययपत्र-कनिर्माणम् (9) मूल्याङ्कनम्, पुनरावृत्तिप्रश्नाः, लेखार्थप्रश्नः ।

2. **राष्ट्रियशिक्षाप्रणाली** 21-35

**(National System of Education)**

माध्यमिकशिक्षाऽऽयोगेन प्रस्ताविता शैक्षिकसंरचना, शिक्षा-आयोगेन प्रस्तावितशिक्षायाः संरचना, राष्ट्रियशिक्षानीतिः, 10+2+3 शिक्षासंरचनाराष्ट्रियसमितिः, शिक्षासमितेः नियुक्तिः कार्यक्षेत्रञ्च, पुनरीक्षणसमितिः, +2, राष्ट्रियपुनरीक्षणसमितिः वा, राष्ट्रियशिक्षा-सम्मेलनम् (1977), शिक्षासम्मेलनं किमर्थम् ? 8+4+3 शिक्षासंरचना, 8+4 शैक्षिकसंरचना एव किमर्थं स्वीकृता, 10+2 किमर्थन्न ? राष्ट्रियशिक्षानीतिः 1986, राष्ट्रियशिक्षाप्रणाली, कार्य-योजना, पुनरावृत्तिप्रश्नाः, लेखार्थप्रश्नः ।

3. **केन्द्रीयस्तरे शिक्षाप्रशासनम्** 36-59

**(Educational Administration at the Centre)**

केन्द्रसर्वकारः, ऐतिहासिकपृष्ठभूमिः, भारतीयसंविधाने शिक्षा - 1. अनुच्छेदः धारा वा 28, 2. धारा 29 (1), धारा 29 (2), 3. धारा 30, राज्यस्य नीतिनिर्देशकतत्त्वानि, संविधानस्य सप्तमी सूचिका ( धारा 246 ), शिक्षायां केन्द्रस्य भूमिका, अखिलभारतीय-

शिक्षाप्रशासनस्वरूपं प्रभावितं करोति। संयुक्तराज्यममेरिकादेशः लोकतान्त्रिक-सिद्धान्तान् स्वीकृत्य स्वतन्त्रोबभूव। अन्य-राष्ट्राणामपेक्षया तस्योदयः नवराष्ट्ररूपेण विलम्बेनाभूत्। अत एव तत्रत्य-लोकतान्त्रिकविचारानुरूपं शिक्षाप्रशासनस्य स्वरूपं लोकतन्त्रात्मकं विकेन्द्रीकृतञ्चाभूत्। रूसदेशः ऐतिहासिकप्रभावात् साम्यवादिदर्शनात् केन्द्रीकृतशिक्षाप्रशासनं स्वीचकार। भारते वर्तमानं शिक्षाप्रशासनं ब्रिटिश-शासनस्यावदानमस्ति। अस्तु नहि कश्चिद्देशः स्वेतिहासपरम्परां विहाय तिष्ठति। एताः परम्पराः तस्य शिक्षाप्रशासने प्रतिबिम्बिताः भवन्ति।

देशस्य संस्कृतिः प्रत्यक्षाप्रत्यक्षरूपेण शिक्षाप्रशासने परिलक्षिता भवति। समाजः स्वसंस्कृतिरक्षणे शिक्षामुखापेक्षी भवति। इच्छति च शिक्षया संस्कृतेः प्रगतिम्। शिक्षाप्रशासनमपि समाजस्येमामपेक्षां ध्यात्वा संस्थानानां सङ्घटनानां वा संचालनं करोति। अत एव शिक्षाप्रशासनं सामाजिकप्रक्रियारूपेण स्वीक्रियते। प्रत्यक्षाप्रत्यक्षतया शिक्षाप्रशासनं सांस्कृतिकवातावरणानुप्राणितं तिष्ठति। अस्य विचारस्य पुष्टिः केण्डल् (Kandel) महोदयस्याधस्तनशब्दैर्निधीयते - ''शिक्षाप्रणाल्यः स्वसांस्कृतिक-पर्यावरणेन प्रभाविताः भवन्ति। न केवलाः राष्ट्रियाः प्रणाल्यः परस्परं भिन्नाः भवन्ति। अपितु यत्र लोकतन्त्रान्तर्गतं विकेन्द्रीकरणं प्रोत्साहनं प्राप्नोति (तत्र) स्थानीयाः प्रणाल्योऽपि परस्परं भिन्नाः भवन्ति।''

**( स ) मनोवैज्ञानिकाधारः -**

अन्यप्रशासनेभ्यो भिन्नं भवति शिक्षाप्रशासनम् यतो हि, तस्य सम्बन्धो व्यक्तिविकासेन भवति। अन्यप्रशासनेषु व्यक्तिविकासः नह्यपेक्षितो भवति। शिक्षा व्यक्तेः सम्पूर्णविकासस्य प्रक्रिया वर्तते, अतः तस्याः प्रशासनं व्यक्त्यादर्शात् पृथक्कर्तुं न शक्नुमः। अस्ति शिक्षाप्रशासनं गतिशीला प्रक्रियैका। शिक्षाप्रशासनस्य केन्द्रं बालकाः भवन्ति **ग्राहम बैलफोर** मतानुसारेण -''शिक्षाप्रशासनस्योद्देश्यमस्ति-यदुपयुक्तबालकान् उपयुक्तशिक्षकैः उपयुक्तशिक्षा उपलब्धार्थिकसाधनैः सौविध्येन शिक्षां प्राप्तुं सहायताप्रदानम्।'' अतः शिक्षाप्रशासनं पत्रावलीकेन्द्रितं न स्यात् अपितु तद्व्यक्तिकेन्द्रितमेव स्यात्। अतः शिक्षाप्रशासनेन व्यक्तेः - शारीरकाध्यात्मिक-संवेगात्मक-सौन्दर्यात्मकादिनां विभिन्नपक्षाणां सर्वतोभावेन विकासाय प्रयतितव्यम्। मनोविज्ञानस्य साहाय्येन बालकानां शक्तिसामर्थ्याभिरुच्यादिकं विज्ञाय तदनुकूलमेव विद्यालयस्य पाठ्यक्रमः, समयतालिकाः, शिक्षणपद्धतिः, शैक्षिकसामग्री च भवेत्, अनया व्यवस्थयैव व्यक्तेः सर्वाङ्गीणविकासः संभविष्यति। पुनश्च शिक्षकाणां कार्यकर्तॄणां

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली